#-S716

F-4
1

नं. ११६ १-२

Complete श्रीनाथादिनिर्णयः श्लोके

नं. १२५४ क
श्री नाथादिश्लोकनिर्णय
४ पत्रानि
तत्काल

ॐ श्रीगणेशाय नमः श्रीगुरवे शिवायौं नमः श्रीदेव्यै
महात्रिपुरसुंदर्यै नमः ॐ श्रीनाथादिगुरुत्रयं गणपतिं ।
पीठत्रयं भैरवं सिद्धौघं वटुकत्रयं पदद्वूतीक्रमं शाम्भवम्
वीरान्द्व्यष्टचतुष्कषष्टिनवकं वीरावलीपंचकं श्रीमन्मा
लिनिमंत्रराजसहितं वन्दे गुरोर्मण्डलम् अस्य निर्णयः
परमगुरु परमाचार्य परमेष्ठिगुरुत्रयम् गणपतिं काम
गिरिपीठं ब्रह्मात्मशक्तिसंयुतं तथा पूर्णगिरिपीठं वि
ष्ण्वात्मशक्तिसंयुतं तथा जालंधरं चैव रुद्रात्मशक्तिसं
युतं वंदे तन्मंत्रपूर्वकम् त्र् भैरवं मदनस्तुरवचक्राद्य

गु॰ फट्कारो भैरवस्ततः एकात्मा रविभक्तश्च तथा श्रीचण्डभै
स्तो॰ रवः नभनिर्मलदेहस्तु तथा ऽमरहमास्करः इत्यष्टौ भैरवाः
८ अथ सिद्धौघम् प्रथमं कुर्मनः सिद्धः सुंदर्यम्बा तथैव च त
थापि विश्वदलाकांबा पूजनीया यथाक्रमम् करालिकां
बा सिद्धस्तु चिपिटांबा तथैव च भीमांबा च करालांबा पू
जनीया यथाक्रमम् खरानानांबा सिद्धस्तु तथा तद्दक्षिणा
नना इति सिद्धौघाः अथ वटुकत्रयम् प्रथमं स्कंदवटु
कः सिद्धाख्यवटुकस्तथा विरिंचिवटुकश्चैव पूजनीया य
थाक्रमम् अथ पदयुगम् प्रकाशश्च विमर्शश्च पदयुगं प्र

पूजयेत् अथहूतीक्रमम् योन्यंबाचतथाहूतीयोनिसि
द्धातथैवच नाथाम्बाशक्तिसंयुक्तापूजनीयायथाक्रमम्।
महायोनिर्दिव्ययोनिरम्बामूर्त्तिस्तथैवच दिव्ययोनिस्तुसि
द्धाख्यानाथाम्बाचयथाक्रमम् शंखयोनिस्तथाचांबाहूतीः
पूज्यायथाक्रमम् पद्मयोनिस्तथाचांबाहूतीशक्तिपुरस्कृ
ता पद्मयोनिस्तथासिद्धानार्थाबाहूतिरेवच अथमण्डल
त्रयम् अग्निःसूर्यश्चसोमश्चमण्डलत्रयमीरितम् अथद
शवीराः सृष्टिबीराःस्थितिवीरःसंहारबीरएवच सर्वेपू
ज्यायथान्यायंभैरवांतायथाक्रमम् भैरवोरक्तवीरस्तुय

गु॰ मवीरस्तथैवच मृत्युवीरो भद्रवीरः परमार्कस्तथैवच
स्तो॰ मार्त्तण्डभैरवो वीरः पूजनीयो यथाक्रमम् कालाग्निरुद्रपी
२ वीरस्तु भैरवांस्तु प्रपूजयेत् अथ चतुःषष्ठिवीराः प्रथमं
मंगलानाथ शौण्डिका च ततः परम् ज्येष्ठकर्णिकनाथो च
पट्टहानाथ एवच कर्मनाथस्तथा पूज्यो धनदानाथ ए
वच गंधानाथस्तथा पूज्यो मातंगनाथ एवच तथैव
च एपकानाथः कैवर्त्तनाथ एवच मातंगगमनानाथः।
सूर्यपत्तस्तथैवच नभोवर्त्तेस्तथा पूज्यः स्योतिकानाथ
एवच तथैव रोपिकानाथो दंष्ट्रानाथस्तथैवच पूज्यो

धूम्राक्षनाथस्तुज्वालानाथस्तथैवच पूज्योगांधारनाथ
स्तुगगनेश्वरएवच मायानाथोमहामायानाथः पूज्योय
थाक्रमम् नित्यनाथस्तथाशांतनाथः पूज्योयथाविधि
विश्वनाथस्तथाकामनाथः पूज्योयथाक्रमम् उमानाथः
श्रियोनाथः सुभगानाथएवच लक्ष्मनाथस्तथाविद्या
मीननाथस्तथैवच पूज्यः सुमन्तनाथश्चचंडनाथस्तथै
वच श्रद्धानाथस्तथापूज्यस्त्वनंतानाथएवच तथैवशं
भरानाथउल्कानाथस्तथैवच पूज्यस्त्रैलोक्यनाथस्तुभी
मनाथस्तथैवच संपूज्योराक्षसीनाथोमालिनीनाथए

गु॰ स्तो॰ ३

3

वच प्रचण्डनाथः पूज्यस्तु स्वनंगानाथ एवच विधिना
थस्तथा पूज्यो नाथानाथस्त्वनभिहितः संपूज्यो नन्दि
नीनाथो नाथो विश्वेश्वरस्तथा कालनाथो महाकालः पू
ज्यो नाथो यथाविधि पूज्यस्त्वभयनाथस्तु विकारनाथ ए
वच महाविकारनाथस्तु श्रृंगारनाथ एवच पूतनाथ
स्तथा पूज्यः शार्वरीनाथ एवच व्योमनाथस्तथा पूज्यो।
नाथानां पंक्तिरेवच अथ मुद्रानवकम् संक्षोभिण्यादि
नवमुद्राः इति मुद्रानवकम् अथ वीरावली पंचकम्
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः पंचवीरावली

पूज्यास्तत्तन्मंत्रेण देशिकैः मालिनीमंत्रराजस्तु पूजनी
यो यथाक्रमम् अथ गुरुमंडलम् अथात्मानन्दनाथ
स्तु परात्मानन्द एवच शांभवानन्दनाथस्तु चिन्मुद्रानन्द
एवच वाग्भवानन्दनाथश्च नीलकंठस्तथैवच प्रसन्ना
नन्दनाथश्च विश्वात्मानन्द एवच संभ्रमानन्दनाथस्तु चि
दानन्दस्तथैवच एवंनाथास्तु संपूज्यास्तत्तन्मंत्रे पुरः
सरम् पश्चात्समाचरेन्नित्यं नित्यकर्म समाचरेत् ॥
इति श्रीनाथादिश्लोकनिर्णयः समाप्ताः ॥ ॥

ग्र·
स्तो·
४

५

(श्रीनाथ्यादिस्तोकनिर्णयः)

